शालिपिष्टं, क्ली (शाले: पिष्टमिव शुभ्रत्वात्।) स्फटिकम्। इति त्रिकाण्डशेष:॥

शालिवाहन:, पुं, राजविशेष:। स तु शककर्त्ता विक्रमादित्यशत्रुश्च॥

शालिहोत्र:, पुं, घोटक:। इति त्रिकाण्डशेष:॥

शाली, [न्] त्रि, (शालास्यास्तीति। इनि:।) शालाविशिष्ट:। पदान्ते युक्तवाचक:। यथा,—
"चन्दनचर्च्चितनीलकलेवरपीतवसनवनमाली।
केलिचलन्मणिकुण्डलमण्डितगण्डयुगस्मित-
शाली॥"
इति जयदेव:॥
(श्लाघ्य:। यथा, भागवते। ३। २४। १।
"दायालु: शालिनीमाह शुक्लाभिर्व्याहृतं
स्मरन्॥")

शाली, स्त्री, कृष्णजीरक:। इति राजनिर्घण्ट:॥

शालीन:, त्रि, (शालाप्रवेशनमर्हतीति। शाला + "शालीनकौपीने अधृष्टाकार्य्ययो:।" ५।२।२०। इति खञ्प्रत्ययेन निपातनात् सिद्धम्।) अधृष्ट:। इत्यमर:॥ (यथा, मार्कण्डेये। ४१।६।
"अथ नित्यं गृहस्थेषु शालीनेषु चरेद्यति:॥")
शालासम्बन्धी च॥

शालीना, स्त्री, (शालिन + टाप्।) मिश्रेया। इति राजनिर्घण्ट:॥

शालु, क्ली, (शृणाति शीतागमे। शॄ + बाहुलकात् ञुण् रेफस्य लत्वञ्च। इत्युज्ज्वल:। १। ५।) शालूकम्। इति शब्दरत्नावली॥

शालु:, पुं, (शॄ + ञुण् रेफस्य लत्वञ्च।) कषायद्रव्यम्। चौरकाख्यौषधि:। इति मेदिनी॥ भेक:। इति हेमचन्द्र:॥

शालुकं, क्ली, कुमुदादिमूलम्। तत्पर्य्याय:। पङ्कसूरणम् २ शालूक: ३ शालु ४। इति शब्दरत्नावली॥

शालूकं, क्ली, (शल + "शलिमण्डिभ्यामूकण्।" उणा० ४। ४२। इति ऊकण्।) कुमुदादिमूलम्। इत्यमर:॥ जातीफलम्। इति राजनिर्घण्ट:॥

शालूक:, पुं, (शल + "शलिमण्डिभ्यामूकण्।" उणा० ४। ४२। इत्यूकण्।) कुमुदादिमूलम्। इति त्रिकाण्डशेष:॥ (यथा, बृहत्संहितायाम्। ४१। ३।
"मिथुनेपि धान्यशारदवल्लीशालूककार्पासा:॥")
मण्डूक:। इति राजनिर्घण्ट:॥

शालूर:, पुं, (शलते प्लवेन गच्छतीति। शल + "खर्ज्जिपिञ्जादिभ्य: ऊरोलचौ।" उणा० ४।६०। इति ऊर:।) भेक:। इत्यमर:॥

शालेयं, त्रि, (शालीनां क्षेत्रम्। शालि + "व्रीहिशाल्योर्ढक्।" ५।२।२। इति ढक्।) शाल्युद्भवक्षेत्रम्। इत्यमर:॥ शालासम्बन्धि शालसम्बन्धि च॥

शालेय:, पुं, मधुरिका। इत्यमर:॥

शालेया, स्त्री, (शालेय + टाप्।) मिश्रेया। इति राजनिर्घण्ट:॥

शालोत्तरीय:, पुं, (शालोत्तरे ग्रामे भव:। शालोत्तर + छ:।) पाणिनिमुनि:। इति त्रिकाण्डशेष:॥

शाल्मल:, पुं, शाल्मलीवृक्ष:। इति शब्दरत्नावली॥ (यथा, महाभारते। ३। ६४। ३।
"अञ्जनारिष्टसञ्छन्नं स्यन्दनैश्च सशाल्मलै:॥")
द्वीपविशेष:। इति शब्दमाला॥ तद्विवरणं यथा,—
"अत ऊर्द्ध्वं प्रवक्ष्यामि शाल्मलस्य निबोधत।
शाल्मलो द्विगुणो द्वीप: क्रौञ्चद्वीपस्य विस्तरात्॥
परिवार्य्य समुद्रन्तु दधिमण्डोदकं स्थित:।
तत्र पुण्या जनपदाश्चिराच्च म्रियते जन:॥
कुत एव सुदुर्भिक्षं क्षमातेजोयुता हि ते।
प्रथम: सूर्य्यसङ्काश: सुमना नाम पर्व्वत:॥
पीतस्तु मध्यमस्तत्र शातकौम्भमयो गिरि:।
नाम्ना सर्व्वसुखो नाम दिव्यौषधिसमन्वित:॥
तृतीयश्चैव सौवर्णो भृङ्गपत्रनिभो गिरि:।
स नाम्ना रोहितो नाम दिव्यो गिरिवरो
महान्॥
सुमना: कुशलो देश: सुखोदर्क: सुखोदय:।
रोहितस्तु तृतीयस्तु रोहिणो नाम विश्रुत:॥
तत्र रत्नान्यनेकानि स्वयं रक्षति वासव:।
प्रजापतिमुपादाय प्रसन्नो विधिवत् स्वयम्॥
न तत्र नद्यो वर्षं वा शीतोष्णञ्चैव तद्विधम्।
वर्णाश्रमाणां वार्त्ता वा त्रिषु द्वीपेषु विद्यते॥
न ग्रहं न च दण्डोऽस्ति ईर्ष्यासूया भयं तथा।
उद्भिदान्युदकान्यत्र गिरिप्रस्रवणानि च॥
भोजनं षड्रसं तत्र तेषां स्वयमुपस्थितम्।
अधमोत्तमो न तेष्वस्ति न लोभो न परिग्रह:॥
अरोगा बलवन्तश्च एकान्तसुखिता: प्रजा:।
त्रिंशद्वर्षसहस्राणि मानसीं सिद्धिमास्थिता:॥
सुखमायु:स्वरूपञ्च धर्म्मैश्वर्य्यं तथैव च।
शाल्मलाद्येषु विज्ञेयं द्वीपेषु त्रिषु सर्व्वश:॥
व्याख्यात: शाल्मलाद्यानां द्वीपानान्तु विधि:
शुभ:।
परिमण्डलस्तु स द्वीपश्चक्रवत् परिवेष्टित:।
सुरोदेन समुद्रेण द्विगुणेन समन्वित:॥"
इति मत्स्यपुराणे भुवनकोषे सप्तद्वीपनिवेशनं नाम १०० अध्याय:॥ * ॥ अपि च।
"प्लक्षद्वीपप्रमाणात्तु द्विगुणेन समन्तत:।
संवेष्ट्येक्षुरसाम्भोधिं शाल्मलि: संव्यवस्थित:॥
सप्त वर्षाणि तत्रैव तत्रैव कुलपर्व्वता:।
ऋज्वायता: सुपर्व्वाण: सप्त नद्यश्च सुव्रता:॥
कुमुदश्चोन्नतश्चैव तृतीयश्च बलाहक:।
द्रोण: कर्ण्णस्तु महिष: ककुद्मान् सप्त पर्व्वता:॥
योनितोया वितृष्णा च चन्द्रा शुक्ला विमोचनी।
निवृत्तिश्चेति ता नद्य: स्मृता: पापहरा:
शिवा:॥
न तेषु विद्यते लोभ: क्रोधो वा द्विजसत्तमा:।
न चैवास्ति युगावस्था जना जीवन्त्यनामया:॥
यजन्ति सततं तत्र वर्णा वायुं सनातनम्।
तेषां तस्याथ सायुज्यं सारूप्यञ्च सलोकताम्॥
कपिला ब्राह्मणा: प्रोक्ता राजानश्चारुणास्तथा।
पीता वैश्यास्तथा कृष्णा द्वीपेऽस्मिन् वृषला
द्विजा:॥"
इति कौर्म्मे भुवनविन्यासे ४६ अध्याय:॥ * ॥
मोचरस:। इति रत्नमाला॥

शाल्मलि:, पुं स्त्री, वृक्षविशेष:। शिमुल इति भाषा॥ (यथा मनौ। ८। ४६।
"शाल्मलीन् शालतालांश्च क्षीरिणश्चैव पादपान्॥")
तत्पर्य्याय:। पिच्छिला २ पूरणी ३ मोचा ४ स्थिरायु: ५। इत्यमर:॥ दुरारोहा ६ शाल्मलिनी ७ शाल्मल: ८। इति शब्दरत्नावली॥ तुलिनी ९ कुक्कुटी १० रक्तपुष्पा ११ कण्टकारी १२ मोचनी १३। इति जटाधर:॥ चिरजीवी १४ पिच्छिल: १५ रक्तपुष्पक: १६ तूलवृक्ष: १७ मोचाख्य: १८ कण्टकद्रुम: १९ रक्तोत्पल: २० रम्यपुष्प: २१ बहुवीर्य्य: २२ यमद्रुम: २३ दीर्घद्रुम: २४ स्थूलफल: २५ दीर्घायु: २६। इति राजनिर्घण्ट:॥ कण्टकाढ्य: २७। इति भावप्रकाश:॥ अस्य गुणा:। पिच्छिलत्वम्। वृष्यत्वम्। बल्यत्वम्। मधुरत्वम्। शीतलत्वम्। कषायत्वम्। लघुत्वम्। स्निग्धत्वम्। शुक्रश्लेष्मवर्द्धनत्वञ्च। तद्रसगुणा:। ग्राहित्वम्। कषायत्वम्। कफनाशित्वञ्च॥ तत्पुष्पं फलञ्च तद्विधम्। इति राजनिर्घण्ट:।
"शाल्मली शीतला स्वाद्वी रसे पाके रसायनी।
श्लेष्मला स्निग्धबीजा च बृंहणी रक्तपित्तजित॥
शाल्मलीपुष्पशाकन्तु घृतसैन्धवसाधितम्।
प्रदरं नाशयत्येव दु:साध्यञ्च न संशय:॥
रसे पाके च मधुरं कषायं शीतलं गुरु।
कफपित्तास्रजिद्ग्राहि वातलञ्च प्रकीर्त्तितम्॥"
इति भावप्रकाश:॥ * ॥
नरकविशेष:। तत्र शाल्मलिकण्टकै: पीड्यन्ते॥

शाल्मलिक:, पुं, (शाल्मली + "वुञ्छण्कठजिति।" ४। २। ८०। इति कुमुदादित्वात् ठक्।) रोहितकवृक्ष:। इति राजनिर्घण्ट:॥

शाल्मलिनी, स्त्री, शाल्मलिवृक्ष:। इति शब्दरत्नावली॥

शाल्मलिपत्रक:, पुं, (शाल्मलिपत्रमिव पत्रं यस्य।) सप्तच्छदवृक्ष:। इति राजनिर्घण्ट:॥

शाल्मलिस्थ:, पुं, (शाल्मलौ वृक्षे तिष्ठतीति। स्था + क:।) गरुड़:। इति राजनिर्घण्ट:॥

शाल्मली, स्त्री, (शाल्मलि + कृदिकारादिति वा ङीष्।) शाल्मलिवृक्ष:। इत्यमर:॥ शलति देर्घ्यात् दूरं गच्छति शाल्मलि:। शल च गतौ नाम्नीति मलिण् वृद्धि:। द्वयोरित्युक्ते स्त्रीपक्षे पाच्छोणादीति ईपि शल्मली च शाल्मलिश्चेति केचित् तन्मते विभाषया वृद्धि:। शल्मली रक्तपुष्पा च कक्कुटी चिरजीविका इति कोषान्तरमिति मुकुट:। इत्यमरटीकायां भरत:॥

शाल्मली, [न्] पुं, (शाल्मल: आश्रयत्वेनास्त्यस्येति। इनि:।) गरुड़:। इति त्रिकाण्डशेष:॥